२परीक्षिन्नाम्नोर्भेदे भा० आदिपर्वणि ९५ अध्याये।

**बाहुबल** न० ६त०। युद्धोपयोगिनि बाहुविक्रमे।

**बाहुभूषा** स्त्री ६त०। केयूरे हेमच०।

**बाहुमात्र** त्रि० बाहुः प्रमाणमस्य बाहु+मात्रच्। बाहुपरिमाणे स्त्रियां ङीप् “बाहुमात्र्यः स्रुच” कात्या०श्रौ० १।३।३७।

**बाहुमूल** न० ६त०। कक्षे (काँक) (वगल) ख्याते अमरः।

**बाहुयुद्ध** न० ३त०। नियुद्धे अमरः।

तत्प्रकारः भा० वि० १३ अ० यथा

“कृतप्रतिकृतैश्चित्रैर्बाहुभिश्च सुसङ्कटैः। सन्निपातावधूतैश्च प्रमाथोन्मथनैस्तथा। क्षेपणैर्मुष्टिभिश्चैव वराहोद्धूतनिःस्वनैः। तलैर्वज्रनिपातैश्च प्रसृष्टाभिस्तथैव च। शलाकानखपातैश्च पादोद्धूतैश्च दारुणैः। जानुभिश्चाश्मनिर्घोषैः शिरोभिश्चावघट्टनैः। तद्युद्धमभवद्घोरमशस्त्रं बाहुतेजसा। बलप्राणेन शूराणां समाजोत्सवसन्निधौ। अरज्यत जनः सर्वः सोत्क्रुष्टनिनदोत्थितः। बलिनोः संयुगे राजन्! वृत्रवासवयोरिव। प्रकर्षणाकर्षणयोरभ्याकर्षविकर्षणैः। आकर्षतुरथान्योन्यं जानुभिश्चापि जघ्नतुः”। मू० “कृतं कश्चिद्दृढे निपीडनं प्रतिकृतं तस्य मोचनम्। सुसङ्कटैः मुष्टिप्रहरणेन कृशीकृतैः सकङ्कटैरिति पाठे सकवचैः सन्निर्णैर्वा “कङ्कटो बाहुवरणे कवचे कठिने किणे” इति विश्वः सन्निपातोऽङ्गसंघट्टनम् अवधूतं तेनैव दूरीकरणं प्रमाथादय उक्ता मल्लशास्त्रे “निपात्य पेषणं भूमौ प्रमाथ इति कथ्यते। यत्तूत्थायाङ्गमथनं तदुन्मथनमुच्यते। क्षेपणं कथ्यते यत्तु स्थानात् प्रच्यावनं हठात्। उभयोर्भुजयोर्मुष्टिस्तयोर्मध्ये निपात्यते। सुष्टिरिच्यते तज्ज्ञैर्मल्लविद्याविशारदैः। अवाङ्मुखं स्वाङ्गगतं भ्रामयित्वा तथैव यः। क्षिप्तस्य शब्दः स भवेद्वराहोद्धूतनिःस्वनः। तलैर्वज्रनिपातैर्वज्रवत्दृढपातैस्तपेटैः। “अङ्गुल्यः प्रसृतास्तास्तु प्रसृष्टा या उदीरिताः। ऋज्वी दृढा कृषा क्षिप्तशलाका साङ्गुली स्मृता”। तस्यानखपातैः पादोद्धूतैः पादप्रसारणेनाक्षेपैः आनुभिः शिरोभिश्च कृतैरवघट्टनैराक्फालनैः अश्मनिर्घोषैरित्युभयविशेषणम्। अशस्त्रं निरस्त्रं यथोक्तं तत्रैव “बाहुयुद्धं हि मल्लानामशस्त्रमृषिभिः स्मृतम्। स्मृतस्य तत्र न स्वर्गो यशोलेशोऽपि विद्यते” इति। बलप्राणेन बलेन शारीरबलेन प्राणेन मानसबलेन च। सोत्क्रुष्टनिनदः कोलाहलशब्दोच्चारणेन यत्जितस्य सहोत्थापनम्। तत्स्तुहितः। “आक्रम्य क्रोडीकरणं प्रकर्षणमुदाहृतम्। आकर्षणं लीलयैव सम्मुखीकरणं स्मृतम्। पुरः पश्चात् पार्श्वयोश्चाभ्याकर्षो भ्रमणं तथा। पश्चात् प्रपातनं वेगाद्विकर्षणमुदाहृतम्” नीलक०।

**बाहुल** पु० बहुलानां कृत्तिकानामयं स्वामी अण्। १वह्नौ शब्दच०। बहुलाभियुक्ता पौर्णमासी अण्। २कार्त्तिकपौर्णमास्यां स्त्री ङीप्। सा यत्र मासे पुनः अण्। ३चान्द्रकार्त्तिकमासे पु० अमरः। ४बाहुत्राणे हेमच०। बहुलेन निर्वृत्तम् सङ्कला०अण्। ५अनेकसाध्ये त्रि०। पृथ्वा०इमनिचोऽभावे भावे अण्। ६बाहुल्ये न०।

**बाहुलक** न० बहुलेन बहुलग्रहणेन निर्वृत्तं सङ्कला०अण् संज्ञायां कन्। व्याकरणोक्तसर्वोपाधिरहिते विधानादौ यत्र यद्विधीयते तत्र कचिन्न स्यात् कचिद्वा स्यात् कचित्ततोऽन्यत्रापि स्यादित्येवं परे विधाननिषेधादौ। मनोज्ञा० भावे वुञ्। २बाहुलिका बहुलभावे स्त्री।

**बाहुलेय** पु० बहुलानामपत्यं ढक्। कार्त्तिकेये अमरः

**बाहुशालिन्** त्रि० बाहुभ्यां शालते तद्विक्रमाधिक्येन श्लाघते शाल–णिनि। बाहुवीर्याधिक्ययुते स्त्रियां ङीप्।

**बाहुसम्भव** पु० बाहू ब्रह्मबाहू सम्भवोऽस्य। १बाहुजे क्षत्रिये हेमच०। २बाहुजातमात्रे त्रि०।

**बाहुसहस्रभृत्** पु० बाहुसहस्रं बिभर्त्ति भृ–क्विप् तुक् च। कार्त्तवीर्ये त्रिका० कार्त्तवीर्यशब्दे दृश्यम्।

**बाह्य** त्रि० बहिर्भवः ष्यञ् टिलोपः। बहिर्भवे

**बाह्यकर्ण** पु० नागभेदे भा० आ० ३५अ०।

**बाह्यकुण्ड** पु० नागभेदे भा० उ० १०२ अ०।

**बाह्वादि** पु० इञ्प्रत्ययनिमित्ते शब्दगणे स च गणः पा०ग० उक्तो यथा “बाहु उपबाहु उपवाकु निवाकु शिवाकु वटाकु उपबिन्दु वृषली वृकला चूड़ा बलाका मूषिका कुशला छगला ध्रुवका धुवका सुमित्रा दुर्मित्रा पुष्करसद् अनुहरत् देवशर्मन् अग्निशर्मन् भद्रशर्मन् सुशर्मन् कुनामन् सुनामन् पञ्चन् सप्तन् अष्टन् अमितौजसः (सलोपश्च) सुधावत् उदञ्चु शिरस् माष शराविन् मरीची क्षेमवृद्धिन् शृङ्खलतोदिन् खरनादिन् नगरमर्दिन् प्राकारमर्दिन् लोमन् अजीगर्त्त कृष्ण युधिष्ठिर अर्जुन साम्ब गद प्रद्युम्न राम उदङ्क उदकः (संज्ञायाम्) सम्भूयोऽम्भसोः (सलोपश्च) बाह्वादिः। बाहविः कार्त्तिः।

**बि(वि)ट** आक्रोशे भ्वा०पर०सक०सेट्। बे(वे)टति अबे(वे)टीत्

**बिटक** पु० पिटक+पृषो०। पिटके अमरे पाठान्तरम्।